# तत्त्वार्थसूत्रम् (मोक्षशास्त्रम्)

## Tattvārthasūtram (Mōkṣaśāstram)

### आचार्य उमास्वामी

### ācārya umāsvāmī

मोक्षमार्गस्य नेतारं भेत्तारं कर्मभूभृताम् ।
ज्ञातारं विश्वतत्त्वानां वंदे तद्गुणलब्धये ||
त्रैकाल्यं द्रव्य-षट्कं नव-पद-सहितं जीव-षट्काय-लेश्या: |
पंचान्ये चास्तिकाया व्रत-समिति-गति-ज्ञान-चारित्र-भेदा: ||
इत्येतन्मोक्षमूलं त्रिभुवन-महितै: प्रोक्तमर्हद्भिरीशै: |
प्रत्येति श्रद्धति स्पृशति च मतिमान् य: स वै शुद्धदृष्टि: ||१||

Mōkṣamārgasya nētāraṁ bhēttāraṁ karmabhūbhr̥tām |
Jñātāraṁ viśvatattvānāṁ vandē tadguṇalabdhayē ||
Traikālyaṁ dravya-ṣaṭkaṁ nava-pada-sahitaṁ jīva-ṣaṭkāya-lēśyā: |
Pañcān'yē cāstikāyā vrata-samiti-gati-jñāna-cāritra-bhēdā: ||
Ityētanmōkṣamūlaṁ tribhuvana-mahitai: Prōktamar'hadbhirīśai: |
Pratyēti śrad'dhāti spr̥śati ca matimān ya: Sa vai śud'dhadr̥ṣṭi: ||1||

सिद्धे जयप्पसिद्धे चउव्विहाराहणा-फलं पत्ते |
वंदित्ता अरहंते वोच्छं आराहणा कमसो ||२||

Sid'dhē jayappasid'dhē ca'uvvihārāhaṇāphalaṁ pattē |
Vandittā arahantē vōccharṁ ārāhaṇā kamasō ||2||

उज्जोवणमुज्जवणं णिव्वाहणं साहणं च णिच्छरणं |
दंसण-णाण-चरित्तं तवाणमाराहणा भणिया ||३||

Ujjōvaṇamujjavaṇaṁ ṇivvāhaṇaṁ sāhaṇaṁ ca ṇiccharaṇaṁ |
Dansaṇa-ṇāṇa-carittaṁ tavāṇamārāhaṇā bhaṇiyā ||3||

सम्यग्दर्शन-ज्ञान-चारित्राणि मोक्षमार्ग: |१|

Samyagdarśana-jñāna-cāritrāṇi mōkṣamārga: |1|

तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् |२|

Tattvārthaśrad'dhānaṁ samyagdarśanam |2|

तन्निसर्गादधिगमाद्वा |३|

Tatnnisargādadhigamādvā |3|


All copyrights reserved © 2Alotus

जीवाजीवास्रव- बन्ध-संवर-निर्जरा-मोक्षास्तत्त्वम् |४|

Jīvājīvāsrava- bandha-sanvara-nirjarā-mōkṣāstattvam |4|

नाम-स्थापना-द्रव्य- भावतस्तन्न्यास: |५|

Nāma-sthāpanā-dravya- bhāvatastann'yāsa: |5|

प्रमाणनयैरधिगम: |६|

Pramāṇanayairadhigama: |6|

निर्देश- स्वामित्व-साधनाधिकरण-स्थिति-विधानत: |७|

Nirdēśa- svāmitva-sādhanādhikaraṇa-sthiti-vidhānata: |7|

सत्संख्या- क्षेत्र-स्पर्शन-कालान्तर-भावाल्पबहुत्वैश्च |८|

Satsaṅkhyā- kṣētra-sparśana-kālāntara-bhāvālpabahutvaiśca |8|

मतिश्रुतावधि- मन:पर्यय-केवलानि ज्ञानम् |९|

Matiśrutāvadhi- mana:Paryaya-kēvalāni jñānam |9|

तत्प्रमाणे |१०|

Tatpramāṇē |10|

आद्ये परोक्षम् |११|

Ādyē parōkṣam |11|

प्रत्यक्षमन्यत् |१२|

Pratyakṣaman'yat |12|

मति: स्मृति: संज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम् |१३|

Mati: Smṛti: Sañjñā cintāabhinibōdha ityanarthāntaram |13|

तदिन्द्रियानिन्द्रिय-निमित्तम् |१४|

Tadindriyānindriya-nimittam |14|

अवग्रहेहावाय-धारणा: |१५|

Avagrahēhāvāya-dhāraṇā: |15|


All copyrights reserved © 2Alotus

बहु-बहुविध- क्षिप्रानि:सृतानुक्त-ध्रुवाणां सेतराणाम् |१६|

Bahu-bahuvidha- kṣiprāni:Sṛtānukta-dhruvāṇāṁ sētarāṇām |16|

अर्थस्य |१७|

Arthasya |17|

व्यंजनस्यावग्रह: |१८|

Vyañjanasyāvagraha: |18|

न चक्षुरनिन्द्रियाभ्याम् |१९|

Na cakṣuranindriyābhyām |19|

श्रुतं मतिपूर्वं द्वयनेकद्वादशभेदम् |२०|

Śrutaṁ matipūrvaṁ dvayanēkadvādaśabhēdam |20|

भवप्रत्ययोऽवधिर्देव- नारकाणाम् |२१|

Bhavapratyayōavadhirdēva- nārakāṇām |21|

क्षयोपशमनिमित्त: षड्विकल्प: शेषाणाम् |२२|

Kṣayōpaśamanimitta: Ṣaḍvikalpa: Śēṣāṇām |22|

ऋजु-विपुलमती मन:पर्यय: |२३|

Ṛju-vipulamatī mana:Paryaya: |23|

विशुद्ध्यप्रतिपाताभ्यां तद्विशेष: |२४|

Viśud'dhyapratipātābhyāṁ tadviśēṣa: |24|

विशुद्धि-क्षेत्र-स्वामि-विषयेभ्योऽवधि-मन:पर्ययो: |२५|

Viśud'dhi-kṣētra-svāmi-viṣayēbhyōavadhi-mana: Paryayayō: |25|

मति-श्रुतयोर्निबन्धो द्रव्येष्वसर्व-पर्यायेषु |२६|

Mati-śrutayōrnibandhō dravyēṣvasarva-paryāyēṣu |26|


All copyrights reserved © 2Alotus

रूपिष्ववधे: |२७|

Rūpiṣvavadhē: |27|

तदनन्तभागे मन:पर्ययस्य |२८|

Tadanantabhāgē mana: Paryayasya |28|

सर्व-द्रव्य-पर्यायेषु केवलस्य |२९|

Sarva-dravya-paryāyēṣu kēvalasya |29|

एकादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्य: |३०|

Ēkādīni bhājyāni yugapadēkasminnācaturbhya: |30|

मति-श्रुतावधयो विपर्ययश्च |३१|

Mati-śrutāvadhayō viparyayaśca |31|

सदसतोरविशेषाद्यदृच्छोपलब्धेरुन्मत्तवत् |३२|

Sadasatōraviśēṣādyadṛcchōpalabdhērunmattavat |32|

नैगम-संग्रह-व्यवहारर्जुसूत्र-शब्द-समभिरूढैवंभूता नया: |३३|

Naigama-saṅgraha-vyavahārarjusūtra-śabda-samabhirūḍhaivambhūtā nayā: |33|

*।। इति तत्त्वार्थसूत्रे मोक्षशास्त्रे प्रथमोऽध्याय: ।।१।।*

*|| Iti tattvārthasūtrē mōkṣaśāstrē prathamōadhyāya: ||1||*

औपशमिक-क्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिक पारिणामिकौ च |१|

Aupaśamika-kṣāyikau bhāvau miśraśca jīvasya svatattvamaudayika pāriṇāmikau ca |1|

द्वि-नवाष्टादशैकविंशति-त्रिभेदा यथाक्रमम् |२|

Dvi-navāṣṭādaśaikavinśati-tribhēdā yathākramam |2|

सम्यक्त्व-चारित्रे |३|

Samyaktva-cāritrē |3|

ज्ञान-दर्शन-दान-लाभ- भोगोपभोग-वीर्याणि च |४|

Jñāna-darśana-dāna-lābha- bhōgōpabhōga-vīryāṇi ca |4|


All copyrights reserved © 2Alotus

ज्ञानाज्ञान-दर्शन-लब्ध्यश्चतुस्त्रि-त्रि-पंचभेदा: सम्यक्त्व-चारित्र-संयमासंयमाश्च |५|

Jñānājñāna-darśana-labdhyaścatustri- tri-pañcabhēdā: Samyaktva-cāritra-sanyamāsanyamāśca |5|

गति-कषाय-लिंग-मिथ्यादर्शनाज्ञानासंयतासिद्धलेश्याश्चतुश्चतु- स्त्र्येकैकैकैक-षड्भेदा: |६|

Gati- kaṣāya-liṅga-mithyādarśanājñānāsamyatāsid'dhalēśyāścatuścatu-stryēkaikaikaika-ṣaḍbhēdā: |6|

जीव भव्याभव्यत्वानि च |७|

Jīva bhavyābhavyatvāni ca |7|

उपयोगो लक्षणम् |८|

Upayōgō lakṣaṇam |8|

स द्विविधोऽष्टचतुर्भेद: |९|

Sa dvividhōaṣṭacaturbhēda: |9|

संसारिणो मुक्ताश्च |१०|

Sansāriṇō muktāśca |10|

समनस्काऽमनस्का: |११|

Samanaskāamanaskā: |11|

संसारिणस्त्रस-स्थावरा: |१२|

Sansāriṇastrasa-sthāvarā: |12|

पृथिव्यप्तेजो-वायु-वनस्पतय: स्थावरा: |१३|

Pṛthivyaptējō-vāyu-vanaspataya: Sthāvarā: |13|

द्वीन्द्रियादयस्त्रसा: |१४|

Dvīndriyādayastrasā: |14|

पंचेन्द्रियाणि |१५|

Pañcēndriyāṇi |15|

द्विविधानि |१६|

Dvividhāni |16|


All copyrights reserved © 2Alotus

निर्वृत्युपकरणे द्रव्येन्द्रियम् |१७|

Nirvṛtyupakaraṇē dravyēndriyam |17|

लब्ध्युपयोगौ भावेन्द्रियम् |१८|

Labdhyupayōgau bhāvēndriyam |18|

स्पर्शन-रसन-घ्राण-चक्षु:-श्रोत्राणि |१९|

Sparśana-rasana-ghrāṇa-cakṣu:-Śrōtrāṇi |19|

स्पर्श-रस-गन्ध-वर्ण-शब्दास्तदर्था: |२०|

Sparśa-rasa-gandha-varṇa-śabdāstadarthā: |20|

श्रुतमनिन्द्रियस्य |२१|

Śrutamanindriyasya |21|

वनस्पत्यन्तानामेकम् |२२|

Vanaspatyantānāmēkam |22|

कृमि-पिपीलिका-भ्रमर-मनुष्यादीनामेकैकवृद्धानि |२३|

Kṛmi-pipīlikā-bhramara-manuṣyādīnāmēkaikavṛd'dhāni |23|

संज्ञिन: समनस्का: |२४|

Sañjñina: Samanaskā: |24|

विग्रहगतौ कर्मयोग: |२५|

Vigrahagatau karmayōga: |25|

अनुश्रेणि गति: |२६|

Anuśrēṇi gati: |26|

अविग्रहा जीवस्य |२७|

Avigrahā jīvasya |27|

विग्रहवती च संसारिण: प्राक् चतुर्भ्य: |२८|

Vigrahavatī ca sansāriṇa: Prāk caturbhya: |28|


All copyrights reserved © 2Alotus

एकसमयाऽविग्रहा |२९|

Ēkasamayāavigrahā |29|

एकं द्वौ त्रीन्वानाहारक: |३०|

Ēkaṁ dvau trīnvānāhāraka: |30|

संमूर्च्छन-गर्भोपपादाजन्म |३१|

Sammūrcchana- garbhōpapādājanma |31|

सचित्त-शीत-संवृता: सेतरा मिश्राश्चैकशस्तद्योनय: |३२|

Sacitta-śīta-sanvr̥tā: Sētarā miśrāścaikaśasta- dyōnaya: |32|

जरायुजाण्डज-पोतानां गर्भ: |३३|

Jarāyujāṇḍaja-pōtānāṁ garbha: |33|

देवनारकाणामुपपाद: |34|

Dēvanārakāṇāmupapāda: |34|

शेषाणां सम्मूर्च्छनम् |३५|

Śēṣāṇāṁ sam'mūrcchanam |35|

औदारिक-वैक्रियिकाहारक-तैजस-कार्मणानि शरीराणि |३६|

Audārika-vaikriyikāhāraka-taijasa-kārmaṇāni śarīrāṇi |36|

परं परं सूक्ष्मम् |३७|

Paraṁ paraṁ sūkṣmam |37|

प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात् |३८|

Pradēśatōasaṅkhyēyaguṇaṁ prāk taijasāt |38|

अनन्तगुणे परे |३९|

Anantaguṇē parē |39|

अप्रतीघाते |४०|

Apratīghātē |40|

अनादिसम्बन्धे च |४१|

Anādisambandhē ca |41|


All copyrights reserved © 2Alotus

सर्वस्य |४२|

Sarvasya |42|

तदादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्य: |४३|

Tadādīni bhājyāni yugapadēkasminnācaturbhya: |43|

निरुपभोगमन्त्यम् |४४|

Nirupabhōgamantyam |44|

गर्भसंमूर्च्छनजमाद्यम् |४५|

Garbha-sammūrcchanajamādya m |45|

औपपादिकं वैक्रियिकम् |४६|

Aupapādikaṁ vaikriyikam |46|

लब्धिप्रत्ययं च |४७|

Labdhipratyayaṁ ca |47|

तैजसमपि |४८|

Taijasamapi |48|

शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव |४९|

Śubhaṁ viśud'dhamavyāghāti cāhārakaṁ pramattasanyatasyaiva |49|

नारक-सम्मूर्च्छिनो नपुंसकानि |५०|

Nāraka-sam'murcchinō napunsakāni |50|

न देवा: |५१|

Na dēvā: |51|

शेषास्त्रिवेदा: |५२|

Śēṣāstrivēdā: |52|

औपपादिक-चरमोत्तम-देहासंख्येयवर्षायुषोऽनपवर्त्यायुष: |५३|

Aupapādika-caramōttama-dēhāsaṅkhyēyavarṣāyuṣōanapavartyāyuṣa: |53|

*।। इति तत्त्वार्थसूत्रे मोक्षशास्त्रे द्वितीयोऽध्याय: ।।२।।*

*|| Iti tattvārthasūtrē mōkṣaśāstrē dvitīyōadhyāya: ||2||*


All copyrights reserved © 2Alotus

रत्न-शर्करा-बालुका-पंक-धूम-तमो-महातम:प्रभा भूमयो घनाम्बुवाताकाशप्रतिष्ठा: सप्ताधोऽध: |१|

Ratna-śarkarā-bālukā-paṅka-dhūma-tamō-mahātama:Prabhā bhūmayō ghanāmbu-vātākāśa-pratiṣṭhā: Saptādhōadha: |1|

तासु त्रिंशत्पंचविंशति-पंचदश-दश-त्रि-पंचोनैक-नरक-शतसहस्राणि-पंच चैव यथाक्रमम् |२|

Tāsu trinśatpañcavinśati-pañcadaśa-daśa-tri-pañcōnaika-naraka śata-sahasrāṇi-pañca caiva yathākramam |2|

नारका नित्याशुभतर लेश्या परिणाम-देह-वेदना-विक्रिया: |३|

Nārakā nityāśubhatara lēśyā pariṇāma-dēha-vēdanā-vikriyā: |3|

परस्परोदीरित-दु:खा: |४|

Parasparōdīrita-du:Khā: |4|

संक्लिष्टा-सुरोदीरित-दु:खाश्च प्राक् चतुर्थ्या: i|५|

Saṅkliṣṭā-surōdīrita-du:Khāśca prāk caturthyā: |5|

तेष्वेक-त्रि-सप्त-दश-सप्तदश-द्वाविंशति-त्रयस्त्रिंशत्सागरोपमा सत्त्वानां परा स्थिति: |६|

Tēṣvēka-tri-sapta-daśa-saptadaśa-dvāviṁśati-trayastriṁśatsāgarōpamā sattvānāṁ parā sthiti: |6|

जंबूद्वीप-लवणोदादय: शुभनामानो द्वीपसमुद्रा: |७|

Jambūdvīpa-lavaṇōdādaya: Śubhanāmānō dvīpasamudrā: |7|

द्विर्द्विर्विष्कम्भा: पूर्व-पूर्वपरिक्षेपिणो वलयाकृतय: |८|

Dvirdvi rviṣkambhā: Pūrva-pūrvaparikṣēpiṇō valayākr̥taya: |8|

तन्मध्ये मेरुनाभिर्वृत्तो योजन-शतसहस्र-विष्कम्भो जम्बूद्वीप: |९|

Tanmadhyē mērunābhirvr̥ ttō yōjana-śatasahasra-viṣkambhō jambūdvīpa: |9|

भरत-हैमवत-हरि-विदेह-रम्यक-हैरण्यवतैरावतवर्षा: क्षेत्राणि |१०|

Bharata-haimavata-hari-vidēha-ramyaka-hairaṇyavatairāvatavarṣā: Kṣētrāṇi |10|

तद्विभाजिन: पूर्वापरायता हिमवन्महाहिमवन्निषधनील-रुक्मिशिखरिणो वर्षधरपर्वता: |११|

Tadvibhājina: Pūrvāparāyatā himavanmahāhimavanniṣadha-nīla-rukmi-śikhariṇō varṣadharaparvatā: |11|


All copyrights reserved © 2Alotus

हेमार्जुन-तपनीय-वैडूर्य-रजत-हेममया: |१२|

Hēmārjuna-tapanīya-vaiḍūrya-rajata-hēmamayā: |12|

मणिविचित्रपार्श्वा उपरि मूले च तुल्यविस्तारा: |१३|

Maṇivicitrapāśrvā upari mūlē ca tulyavistārā: |13|

पद्म-महापद्म-तिगिंछ-केसरि-महापुंडरीक-पुंडरीका ह्रदास्तेषामुपरि |१४|

Padma-mahāpadma-tigiñcha-kēsari-mahāpuṇḍarīka-puṇḍarīkā hradāstēṣāmupari |14|

प्रथमो योजन-सहस्रायामस्तदर्द्धविष्कम्भो ह्रद: |१५|

Prathamō yōjana-sahasrāyāmastadard'dhaviṣkambhō hrada: |15|

दश-योजनावगाह: |१६|

Daśa-yōjanāvagāha: |16|

तन्मध्ये योजनं पुष्करम् |१७|

Tanmadhyē yōjanaṁ puṣkaram |17|

तद्द्विगुण-द्विगुणा ह्रदा: पुष्कराणि च |१८|

Taddviguṇa-dviguṇā hradā: Puṣkarāṇi ca |18|

तन्निवासिन्यो देव्य: श्री-ह्री-धृति-कीर्ति-बुद्धि-लक्ष्म्य: पल्योपमस्थितय: ससामानिकपरिषत्का: |१९|

Tatrivāsin'yō dēvya: Śrī-hrīṁ-dhṛti-kīrti-bud'dhi-lakṣmya: Palyōpamasthitaya: Sasāmānikapariṣatkā: |19|

गंगा-सिन्धु-रोहिद्रोहितास्या-हरिद्धरिकान्ता सीता-सीतोदा-नारी-नरकान्ता-सुवर्ण-रुप्यकूला-रक्ता-रक्तोदा: सरितस्तन्मध्यगा: |२०|

Gaṅgā-sindhu-rōhidrōhitāsyā-harid'dharikāntā sītā-sītōdā-nārī-narakāntā- suvarṇa-rupyakūlā-raktā-raktōdā: Saritastanmadhyagā: |20|

द्वयोर्द्वयो: पूर्वा: पूर्वगा: |२१|

Dvayōrdvayō: Pūrvā: Pūrvagā: |21|

शेषास्त्वपरगा: |२२|

Śēṣāstvaparagā: |22|


All copyrights reserved © 2Alotus

चतुर्दश-नदी-सहस्र-परिवृता गंगा-सिन्ध्वादयो नद्य: |२३|

Caturdaśa-nadī- sahasra-parivṛtā gaṅgā-sindhvādayō nadya: |23|

भरत: षड्विंश-पंच-योजन-शत-विस्तार: षट् चैकोनविंशति-भागा योजनस्य |२४|

Bharata: Ṣaḍviṁśa-pañca-yōjana-śata-vistāra: Ṣaṭ caikōnavinśati-bhāgā yōjanasya |24|

तद् द्विगुण-द्विगुण-विस्तारा वर्षधर-वर्षा विदेहान्ता: |२५|

Tad dviguṇa-dviguṇa-vistārā varṣadhara-varṣā vidēhāntā: |25|

उत्तरा दक्षिण-तुल्या: |२६|

Uttarā dakṣiṇa-tulyā: |26|

भरतैरावतयोर्वद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणीभ्याम् |२७|

Bharatairāvatayōrvad'dhihrasau ṣaṭsamayābhyāmutsarpiṇyavasarpiṇībhyām |27|

ताभ्यामपरा भूमयोऽवस्थिता: |२८|

Tābhyāmaparā bhūmayōavasthitā: |28|

एक-द्वि-त्रि-पल्योपम-स्थितयो हैमवतक-हारिवर्षक-दैवकुरवका: |२९|

Ēka-dvi-tri-palyōpama-sthitayō haimavataka-hārivarṣaka-daivakuravakā: |29|

तथोत्तरा: |३०|

Tathōttarā: |30|

विदेहेषु संख्येयकाला: |३१|

Vidēhēṣu saṅkhyēyakālā: |31|

भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशतभाग: |३२|

Bharatasya viṣkambhō jambūdvīpasya navatiśatabhāga: |32|

द्विर्धातकीखंडे |३३|

Dvirdhātakīkhaṇḍē |33|

पुष्करार्द्धे च |34|

Puṣkarārd'dhē ca |34|


All copyrights reserved © 2Alotus

प्राङ्मानुषोत्तरान्मनुष्या: |३५|

Prāgmānuṣōttarānmanuṣyā: |35|

आर्या म्लेच्छाश्च |३६|

Āryā mlēcchāśca |36|

भरतैरावत-विदेहा: कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्य: |३७|

Bharatairāvata-vidēhā: Karmabhūmayōan'yatra dēvakurūttarakurubhya: |37|

नृस्थिती परावरे त्रिपल्योपमान्तर्मुहूर्ते |३८|

Nr̥sthitī parāvarē tripalyōpamāntarmuhūrtē |38|

तिर्यग्योनिजानां च |३९|

Tiryagyōnijānāṁ ca |39|

*।। इति तत्त्वार्थसूत्रे मोक्षशास्त्रे तृतीयोऽध्याय: ।। ३।।*

*// Iti tattvārthasutre mōkṣaśāstrē tr̥tīyōadhyāya: //3//*

देवाश्चतुर्णिकाया: |१|

Dēvāścaturṇikāyā: |1|

आदितस्त्रिषु पीतान्तलेश्या: |२|

Āditastriṣu pītāntalēśyā: |2|

दशाष्ट-पंच-द्वादशविकल्पा: कल्पोपपन्नपर्यन्ता: |३|

Daśāṣṭa-pañca-dvādaśavikalpā: Kalpōpapannaparyantā: |3|

इन्द्र-सामानिक-त्रायस्त्रिंश-पारिषदात्मरक्ष-लोकपालानीक-प्रकीर्णकाभियोग्य किल्विषिकाश्चैकश: |४|

Indra-sāmānika-trāyastrinśa-pāriṣadātmarakṣa-lōkapālānīka-prakīrṇakābhiyōgya-kilviṣikāścaikaśa: |4|

त्रायस्त्रिंशलोकपालवर्ज्या व्यन्तरज्योतिष्का: |५|

Trāyastrinśa-lōkapālavaryā vyantarajyōtiṣkā: |5|

पूर्वयोर्द्वीन्द्रा: |६|

Pūrvayōrdvīndrā: |6|


All copyrights reserved © 2Alotus

कायप्रवीचारा आ ऐशानात् |७|

Kāyapravīcārā ā aiśānāt |7|

शेषा: स्पर्श-रूप-शब्द-मन: प्रवीचारा: |८|

Śēṣā: Sparśa-rūpa-śabda-mana: Pravīcārā: |8|

परेऽप्रवीचारा: |९|

Parēapravīcārā: |9|

भवनवासिनोऽसुर-नाग-विद्युत्सुपर्णाग्नि-वात-स्तनितोदधि-द्वीप-दिक्कुमारा: |१०|

Bhavanavāsinōasura-nāga-vidyutsuparṇāgni-vāta-stanitōdadhi-dvīpa-dikkumārā: |10|

व्यन्तरा: किन्नर-किंपुरुष-महोरग-गन्धर्व-यक्ष-राक्षस-भूत-पिशाचा: |११|

Vyantarā: Kinnara-kimpuruṣa-mahōraga-gandharva-yakṣa-rākṣasa-bhūta-piśācā: |11|

ज्योतिष्का: सूर्याचन्द्रमसौ ग्रह-नक्षत्र-प्रकीर्णक-तारकाश्च |१२|

Jyōtiṣkā: Sūryācandramasau graha-nakṣatra-prakīṛṇaka- tārakāśca |12|

मेरुप्रदक्षिणा नित्यगतयो नृलोके |१३|

Mērupradakṣiṇā nityagatayō nṛlōkē |13|

तत्कृत: काल-विभाग: |१४|

Tatkṛta: Kāla-vibhāga: |14|

बहिरवस्थिता: |१५|

Bahiravasthitā: |15|

वैमानिका: |१६|

Vaimānikā: |16|

कल्पोपपन्ना: कल्पातीताश्च |१७|

Kalpōpapannā: Kalpātītāśca |17|

उपर्युपरि |१८|

Uparyupari |18|


All copyrights reserved © 2Alotus

सौधर्मैशान-सानत्कुमार-माहेन्द्र-ब्रह्म-ब्रह्मोत्तर-लान्तव-कापिष्ठ-शुक्र-महाशुक्र-शतार-सहस्रारेष्वानत-प्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजय-वैजयन्त-जयन्तापराजितेषु सर्वार्थसिद्धौ च |१९|

Saudharmaiśāna-sānatkumāra-māhēndra-brahma-brahmōttara-lāntava-kāpiṣṭha-śukra- mahāśukra-śatāra-sahasrārēṣvānata-prāṇatayōrāraṇācyutayōrnavasu graivēyakēṣu vijaya-vaijayanta-jayantāparājitēṣu sarvārthasid'dhau ca |19|

स्थिति-प्रभाव-सुख-द्युति-लेश्या-विशुद्धीन्द्रियावधि-विषयतोऽधिकाः |२०|

Sthiti-prabhāva-sukha-dyuti-lēśyā-viśud'dhīndriyāvadhi-viṣayatōadhikāḥ |20|

गति-शरीर-परिग्रहाभिमानतो हीनाः |२१|

Gati-śarīra-parigrahābhimānatō hīnāḥ |21|

पीत-पद्म-शुक्ल-लेश्या द्वि-त्रि-शेषेषु |२२|

Pīta-padma-śukla-lēśyā dvi-tri-śēṣēṣu |22|

प्राग्ग्रैवेयकेभ्यः कल्पाः |२३|

Prāggraivēyakēbhyaḥ Kalpāḥ |23|

ब्रह्मलोकालया लौकान्तिकाः |२४|

Brahmalōkālayā laukāntikāḥ |24|

सारस्वतादित्य-वह्न्यरुण-गर्दतोय-तुषिताव्याबाधारिष्टाश्च |२५|

Sārasvatāditya- vahn'yaruṇa-gardatōya-tuṣitāvyābādhāriṣṭāśca |25|

विजयादिषु द्विचरमाः |२६|

Vijayādiṣu dvicaramāḥ |26|

औपपादिक-मनुष्येभ्यः शेषास्तिर्यग्योनयः |२७|

Aupapādika-manuṣyēbhyaḥ Śēṣāstiryagyōnayaḥ |27|

स्थितिरसुर-नाग-सुपर्ण-द्वीप-शेषाणां सागरोपम-त्रिपल्योपमार्द्धहीनमिताः |२८|

Sthitirasura-nāga-suparṇa-dvīpa-śēṣāṇāṁ sāgarōpama-tripalyō-pamārd'dhahīnamitāḥ |28|


All copyrights reserved © 2Alotus

सौधर्मैशानयो: सागरोपमेऽधिके |२९|

Saudharmaiśānayō: Sāgarōpamēadhikē |29|

सानत्कुमार-माहेन्द्रयो: सप्त |३०|

Sānatkumāra-māhēndrayō: Sapta |30|

त्रि-सप्त-नवैकादश-त्रयोदश-पंचदशभिरधिकानि तु |३१|

Tri-sapta-navaikādaśa- trayōdaśa-pañcadaśabhiradhikāni tu |31|

आरणाच्युतादूर्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च |३२|

Āraṇācyutādū-rvnamēkaikēna navasu graivēyakēṣu vijayādiṣu sarvārthasid'dhau ca |32|

अपरा पल्योपममधिकम् |३३|

Aparā palyōpamamadhikam |33|

परत: परत: पूर्वापूर्वाऽनन्तरा |३४|

Parata: Parata: Pūrvāpūrvāanantarā |34|

नारकाणां च द्वितीयादिषु |३५|

Nārakāṇāṁ ca dvitīyādiṣu |35|

दशवर्षसहस्राणि प्रथमायाम् |३६|

Daśavarṣasahasrāṇi prathamāyām |36|

भवनेषु च |३७|

Bhavanēṣu ca |37|

व्यन्तराणां च |३८|

Vyantarāṇāṁ ca |38|

परा पल्योपममधिकम् |३९|

Parā palyōpamamadhikam |39|

ज्योतिष्काणां च |४०|

Jyōtiṣkāṇāṁ ca |40|


All copyrights reserved © 2Alotus

तदष्टभागोऽपरा |४१|

Tadaṣṭabhāgōaparā |41|

लौकान्तिकानामष्टौ सागरोपमाणि सर्वेषाम् ||४२||

Laukāntikānāmaṣṭau sāgarōpamāṇi sarvēṣām ||42||

*।। इति तत्त्वार्थसूत्रे मोक्षशास्त्रे चतुर्थोऽध्यायः ।।४।।*

*|| Iti tattvārthāsutrē mōkṣaśāstrē caturthōadhyāya: ||4||*

अजीवकाया धर्माधर्माकाशपुद्गलाः |१|

Ajīvakāyā dharmādharmākāśapudgalā: |1|

द्रव्याणि |२|

Dravyāṇi |2|

जीवाश्च |३|

Jīvāśca |3|

नित्यावस्थितान्यरूपाणि |४|

Nityāvasthitān'yarūpāṇi |4|

रूपिणः पुद्गलाः |५|

Rūpiṇa: Pudgalā: |5|

आ आकाशादेकद्रव्याणि |६|

Ā ākāśādēkadravyāṇi |6|

निष्क्रियाणि च |७|

Niṣkriyāṇi ca |7|

असंख्येयाः प्रदेशा धर्माधर्मैकजीवानाम् |८|

Asaṅkhyēyā: Pradēśā dharmādharmaikajīvānām |8|

आकाशस्यानन्ताः |९|

Ākāśasyānantā: |9|


All copyrights reserved © 2Alotus

संख्येयासंख्येयाश्च पुद्गलानाम् |१०|

Saṅkhyēyāsaṅkhyēyāśca pudgalānām |10|

नाणो: |११|

Nāṇō: |11|

लोकाकाशेऽवगाह: |१२|

Lōkākāśēavagāha: |12|

धर्माधर्मयो: कृत्स्ने |१३|

Dharmādharmayō: Kr̥tsnē |13|

एकप्रदेशादिषु भाज्य: पुद्गलानाम् |१४|

Ēkapradēśādiṣu bhājya: Pudgalānām |14|

असंख्येय भागादिषु जीवानाम् |१५|

Asaṅkhyēya bhāgādiṣu jīvānām |15|

प्रदेशसंहार-विसर्पाभ्यां प्रदीपवत् |१६|

Pradēśasanhāra-visarpābhyāṁ pradīpavat |16|

गति-स्थित्युपग्रहौ धर्माधर्मयोरुपकार: |१७|

Gati-sthityupagrahau dharmādharmayōrupakāra: |17|

आकाशस्यावगाह: |१८|

Ākāśasyāvagāha: |18|

शरीर-वाङ्-मन:-प्राणापाना: पुद्गलानाम् |१९|

Śarīra-vāg-mana:-Prāṇāpānā: Pudgalānām |19|

सुख-दु:ख-जीवितमरणोपग्रहाश्च |२०|

Sukha-du:Kha-jīvitamaraṇōpagrahāśca |20|

परस्परोग्रहो जीवानाम् |२१|

Parasparōgrahō jīvānām |21|


All copyrights reserved © 2Alotus

वर्तना-परिणाम-क्रिया: परत्वापरत्वे च कालस्य |२२|

Vartanā-pariṇāma-kriyā: paratvāparatvē ca kālasya |22|

स्पर्श-रस-गन्ध-वर्णवन्त: पुद्गला: |२३|

Sparśa-rasa-gandha-varṇavanta: Pudgalā: |23|

शब्द-बन्ध-सौक्ष्म्य-स्थौल्य-संस्थान-भेद-तमश्छायातपोद्योतवन्तश्च |२४|

Śabda-bandha-saukṣmya-sthaulya-sansthāna-bhēda-tamaśchāyātapōdyōtavantaśca |24|

अणव: स्कन्धाश्च |२५|

Aṇava: Skandhāśca |25|

भेद-संघातेभ्य: उत्पद्यन्ते |२६|

Bhēda-saṅghātēbhya: Utpadyantē |26|

भेदादणु: |२७|

Bhēdādaṇu: |27|

भेद-संघाताभ्यां चाक्षुष: |२८|

Bhēda-saṅghātābhyāṁ cākṣuṣa: |28|

सद् द्रव्य-लक्षणम् |२९|

Sad dravya-lakṣaṇam |29|

उत्पाद-व्यय-ध्रौव्य-युक्तं सत् |३०|

Utpāda-vyaya-dhrauvya-yuktaṁ sat |30|

तद्भावाव्ययं नित्यम् |३१|

Tadbhāvāvyayaṁ nityam |31|

अर्पितानर्पितसिद्धे: |३२|

Arpitānarpitasid'dhē: |32|

स्निग्ध-रूक्षत्वाद् बन्ध: |३३|

Snigdha-rūkṣatvād bandha: |33|


All copyrights reserved © 2Alotus

न जघन्यगुणानाम् |३४|

Na jaghan'yaguṇānām |34|

गुणसाम्ये सदृशानाम् |३५|

Guṇasāmyē sadṛśānām |35|

द्वयधिकादि-गुणानां तु |३६|

Dvayadhikādi-guṇānāṁ tu |36|

बन्धेऽधिकौ पारिणामिकौ च |३७|

Bandhēadhikau pāriṇāmikau ca |37|

गुणपर्ययवद् द्रव्यम् |३८|

Guṇaparyayavad dravyam |38|

कालश्च |३९|

Kālaśca |39|

सोऽनन्तसमय: |४०|

Sōanantasamaya: |40|

द्रव्याश्रया निर्गुणा गुणा: |४१|

Dravyāśrayā nirguṇā guṇā: |41|

तद्भाव: परिणाम: |४२|

Tadbhāva: Pariṇāma: |42|

*।। इति तत्त्वार्थसूत्रे मोक्षशास्त्रे पंचमोऽध्याय: ।।५।।*

*|| Iti tattvārthasutrē mōkṣaśāstrē pañcamōadhyāya: ||5||*

काय-वाङ्-मन: कर्मयोग: |१|

Kāya-vāṛ-mana: Karmayōga: |1|

स आस्रव: |२|

Sa āsrava: |2|


All copyrights reserved © 2Alotus

शुभ: पुण्यस्याशुभ: पापस्य |३|

Śubha: Puṇyasyāśubha: Pāpasya |3|

सकषायाकषाययो: साम्परायिकेर्यापथयो: |४|

Sakaṣāyākaṣāyayō: Sāmparāyikēryāpathayō: |4|

इन्द्रिय-कषायाव्रत-क्रिया: पंच-चतु:-पंच-पंचविंशतिसंख्या: पूर्वस्य भेदा: |५|

Indriya-kaṣāyāvrata-kriyā: Pañca-catu:-Pañca-pañcavinśatisaṅkhyā: Pūrvasya bhēdā: |5|

तीव्र-मन्द-ज्ञाताज्ञात-भावाधिकरण-वीर्य-विशेषेभ्यस्तद्विशेष: |६|

Tīvra-manda-jñātājñāta-bhāvādhikaraṇa-vīrya- viśēṣēbhyastadviśēṣa: |6|

अधिकरणं जीवाजीवा: |७|

Adhikaraṇaṁ jīvājīvā: |7|

आद्यं संरम्भ-समारम्भारम्भ-योग-कृत-कारितानुमत-कषाय-विशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकश: |८|

Ādyaṁ sanrambha-samārambhārambha-yōga-kṛta- kāritānumata-kaṣāya-viśēṣaistristristriścatuścaikaśa: |8|

निर्वर्तना-निक्षेप-संयोग-निसर्गा द्वि-चतुर्द्वित्रिभेदा: परम् |९|

Nirvartanā-nikṣēpa-sanyōga- nisargā dvi-caturdvi-tribhēdā: Param |9|

तत्प्रदोष-निह्नव- मात्सर्यान्तरायासादनोपघाता ज्ञान-दर्शनावरणयो: |१०|

Tatpradōṣa-nihnava- mātsaryāntarāyāsādanōpaghātā jñāna-darśanā-varaṇayō: |10|

दु:ख-शोक-तापाक्रन्दन-वध-परिदेवनान्यात्म-परोभयस्थान्यसद्वेद्यस्य |११|

Du:Kha-śōka-tāpākrandana-vadha-paridēvanān'yātma-parōbhaya sthān'yasadvēdyasya |11|

भूत-व्रत्यनुकम्पा-दान-सरागसंयमादि-योग:क्षांति: शौचमिति सद्वेद्यस्य |१२|

Bhūta-vratyanukampā-dāna- sarāgasanyamādi-yōga: Kṣānti: Śaucamiti sadvēdyasya |12|


All copyrights reserved © 2Alotus

केवलि-श्रुत-संघ-धर्म-देवावर्णवादो दर्शनमोहस्य |१३|

Kēvali-śruta-saṅgha-dharma-dēvāvarṇavādō darśanamōhasya |13|

कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य |१४|

Kaṣāyōdayāttīvrapariṇāmaścāritramōhasya |14|

बह्वारम्भपरिग्रहत्वं नारकस्यायुष: |१५|

Bahvārambha-parigrahatvaṁ nārakasyāyuṣa: |15|

माया तैर्यग्योनस्य |१६|

Māyā tairyagyōnasya |16|

अल्पारम्भ-परिग्रहत्वं मानुषस्य |१७|

Alpārambha-parigrahatvaṁ mānuṣasya |17|

स्वभावमार्दवं च |१८|

Svabhāvamārdavaṁ ca |18|

नि:शील-व्रतत्वं च सर्वेषाम् |१९|

Ni:Śīla-vratatvaṁ ca sarvēṣām |19|

सरागसंयम-संयमासंयमाकाम-निर्जरा-बालतपांसि दैवस्य |२०|

Sarāgasanyama-sanyamāsanyamākāma-nirjarā-bālatapānsi daivasya |20|

सम्यक्त्वं च |२१|

Samyaktvaṁ ca |21|

योगवक्रता विसंवादनं चाशुभस्य नाम्न: |२२|

Yōgavakratā visamvādanaṁ cāśubhasya nāmna: |22|

तद्विपरीतं शुभस्य |२३|

Tadviparītaṁ śubhasya |23|


All copyrights reserved © 2Alotus

दर्शन-विशुद्धिर्विनयसम्पन्नता-शीलव्रतेष्वनतीचारोऽभीक्ष्णज्ञानोपयोग-संवेगौ-शक्तितस्त्याग-तपसी-साधुसमाधिर्वैयावृत्यकरणमर्हदाचार्य-बहुश्रुत-प्रवचनभक्तिरावश्यका - परिहाणिर्मार्गप्रभावना-प्रवचनवत्सलत्वमिति तीर्थंकरत्वस्य |२४|

Darśana-viśud'dhirvinayasampannatā-śīlavratēṣvanatīcārō-abhīkṣṇajñānōpayōga-sanvēgau-śaktitastyāga-tapasī-sādhusamādhirvaiyāvṛtyakaraṇamar'hadācārya-bahuśruta-pravacanabhaktirāvaśyakā-parihāṇirmārgaprabhāvanā-pravacanavatsalatvamiti tīrthaṅkaratvasya |24|

परात्म-निन्दा-प्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य |२५|

Parātma-nindā-praśansē sadasadguṇōcchādanōdbhāvanē ca nīcairgōtrasya |25|

तद्विपर्ययो नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य |२६|

Tadviparyayō nīcairvṛttyanutsēkau cōttarasya |26|

विघ्नकरणमन्तरायस्य |२७|

Vighnakaraṇamantarāyasya |27|

*।। इति तत्त्वार्थसूत्रे मोक्षशास्त्रे षष्ठोऽध्याय: ।। ६ ।।*

*|| Iti tattvārthasutrē mōkṣaśāstrē ṣaṣṭhōadhyāya: ||6||*

हिंसाऽनृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् |१|

Himsāanṛta-stēyābrahma-parigrahēbhyō viratirvratam |1|

देश-सर्वतोऽणुमहती |२|

Dēśa-sarvatōaṇumahatī |2|

तत्स्थैर्यार्थं भावना: पंच पंच |३|

Tatsthairyārtham bhāvanā: Pañca pañca |3|

वाङ्मनोगुप्तीर्यादाननिक्षेपण-समित्यालोकितपान-भोजनानि पंच |४|

Vāgmanōguptīryādānanikṣēpaṇa-samityālōkitapāna-bhōjanāni pañca |4|

क्रोध-लोभ-भीरुत्व-हास्य-प्रत्याख्यानान्यनुवीचिभाषणं च पंच |५|

Krōdha-lōbha-bhīrutva-hāsya-pratyākhyānān'yanuvīcibhāṣaṇaṁ ca pañca |5|


All copyrights reserved © 2Alotus

शून्यागार-विमोचितावास-परोपरोधाकरण-भैक्ष्यशुद्धि- सद्धर्माविसंवादा: पञ्च |६|

Śūn'yāgāra-vimōcitāvāsa-parōparōdhākaraṇa-bhaikṣyaśud'dhi-
sad'dharmāvisamvādā: Pañca |6|

स्त्रीरागकथाश्रवण-तन्मनोहरांगनिरीक्षण-पूर्वरतानुस्मरण-वृष्येष्टरस-स्वशरीरसंस्कार-त्यागा: पञ्च |७|

Strīrāgakathāśravaṇa-tanmanōharāṅganirīkṣaṇa-pūrvaratānusmaraṇa-
vṛṣyēṣṭarasa-svaśarīrasanskāra-tyāgā: Pañca |7|

मनोज्ञामनोज्ञेन्द्रियविषय-राग-द्वेषवर्जनानि पञ्च |८|

Manōjñāmanōjñēndriyaviṣaya-rāga-dvēṣavarjanāni pañca |8|

हिंसादिष्विहामुत्रापायावद्यदर्शनम् |९|

Himsādiṣvihāmutrāpāyāvadyadarśanam |9|

दु:खमेव वा |१०|

Du:Khamēva vā |10|

मैत्री-प्रमोद-कारुण्य-माध्यस्थानि च सत्त्व-गुणाधिक-क्लिश्यमानाविनेयेषु |११|

Maitrī-pramōda-kāruṇya-mādhyasthāni ca sattva- guṇādhika-kliśyamānā-vineyēṣu
|11|

जगत्कायस्वभावौ वा संवेग-वैराग्यार्थम् |१२|

Jagatkāyasvabhāvau vā samvēga-vairāgyārtham |12|

प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा |१३|

Pramattayōgātprāṇavyaparōpaṇaṁ himsā |13|

असदभिधानमनृतम् |१४|

Asadabhidhānamanṛtam |14|

अदत्तादानं स्तेयम् |१५|

Adattādānaṁ stēyam |15|

मैथुनमब्रह्म |१६|

Maithunamabrahma |16|

मूर्च्छा परिग्रह: |१७|

Mūrchā parigraha: |17|


All copyrights reserved © 2Alotus

नि:शल्यो व्रती |१८|

Ni:Śalyō vratī |18|

अगार्यनगारश्च |१९|

Agāryanagāraśca |19|

अणुव्रतोऽगारी |२०|

Aṇuvratōagārī |20|

दिग्देशानर्थदण्डविरति-सामायिक-प्रोषधोपवासोपभोग-परिभोगपरिमाणातिथिसंविभागव्रत-सम्पन्नश्च |२१|

Digdēśānarthadaṇḍavirati-sāmāyika-prōṣadhōpavāsōpabhōga-paribhōga-parimāṇātithisamvibhāgavrata-sampannaśca |21|

मारणान्तिकीं सल्लेखनां जोषिता |२२|

Māraṇāntikīṁ sallēkhanāṁ jōṣitā |22|

शंका-कांक्षा-विचिकित्साऽन्यदृष्टिप्रशंसा-संस्तवा: सम्यग्दृष्टेरतीचारा: |२३|

Śaṅkā-kāṅkṣā-vicikitsā-an'yadṛṣṭipraśansā-sanstavā: Samyagdṛṣṭēratīcārā: |23|

व्रतशीलेषु पञ्च पञ्च यथाक्रमम् |२४|

Vrataśīlēṣu pañca pañca yathākramam |24|

बन्ध-वधच्छेदातिभारारोपणान्नपाननिरोधा: |२५|

Bandha-vadhacchēdātibhārārōpaṇānnapānanirōdhā: |25|

मिथ्योपदेश-रहोभ्याख्यान-कूटलेखक्रिया-न्यासापहार-साकारमन्त्रभेदा: |२६|

Mithyōpadēśa-rahōbhyākhyāna-kūṭalēkhakriyā-n'yāsāpahāra-sākāramantrabhēdā: |26|

स्तेनप्रयोग-तदाहृतादान-विरुद्धराज्यातिक्रम-हीनाधिकमानोन्मान-प्रतिरूपकव्यवहारा: |२७|

Stēnaprayōga-tadāhṛtādāna-virud'dharājyātikrama-hīnādhikamānōnmāna-pratirūpakavyavahārā: |27|

परविवाहकरणेत्वरिका-परिगृहीतापरिगृहीतागमनानंगक्रीडा-कामतीव्राभिनिवेशा: |२८|

Paravivāhakaraṇētvarikā-parigṛhītāparigṛhītāgamanānaṅgakrīḍā-kāmatīvrābhinivēśā: |28|


All copyrights reserved © 2Alotus

क्षेत्र-वास्तु-हिरण्य-सुवर्ण-धन-धान्य-दासी-दास-कुप्यप्रमाणातिक्रमा: |२९|

Kṣētra-vāstu-hiraṇya-suvarṇa-dhana-dhān'ya-dāsī-dāsa-kupyapramāṇātikramā: |29|

ऊर्ध्वाधस्तिर्यग्व्यतिक्रम-क्षेत्रवृद्धि-स्मृत्यंतराधानानि |३०|

Ūrdhvādhastiryag-vyatikrama-kṣētravr̥d'dhi-smr̥tyantarādhānāni |30|

आनयन-प्रेष्यप्रयोग-शब्द-रूपानुपात-पुद्गलक्षेपा: |३१|

Ānayana-prēṣyaprayōga-śabda-rūpānupāta-pudgalakṣēpā: |31|

कन्दर्प-कौत्कुच्य-मौखर्या-समीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि |३२|

Kandarpa-kautkucya-maukharyā-samīkṣyādhikaraṇō-pabhōgaparibhōgānarthakyāni |32|

योग-दुष्प्रणिधानानादर-स्मृत्यनुपस्थानानि |३३|

Yōga-duṣpraṇidhānānādara-smr̥tyanupasthānāni |33|

अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादान-संस्तरोपक्रमणानादर-स्मृत्यनुपस्थानानि |३४|

Apratyavēkṣitāpramārjitōtsargādāna-sanstarōpakramaṇānādara-smr̥tyanupasthānāni |34|

सचित्त-संबंध-सम्मिश्राभिषव-दु:पक्वाहारा: |३५|

Sacitta-sambandha-sam'miśrābhiṣava-du:Pakvāhārā: |35|

सचित्तनिक्षेपापिधान- परव्यपदेश-मात्सर्यकालातिक्रमा: |३६|

Sacittanikṣēpāpidhāna-paravyapadēśa-mātsaryakālātikramā: |36|

जीवित-मरणाशंसा-मित्रानुराग-सुखानुबन्ध-निदानानि |३७|

Jīvita-maraṇāśansā-mitrānurāga-sukhānubandha-nidānāni |37|

अनुग्रहार्थं स्वस्यातिसर्गो दानम् |३८|

Anugrahārtham̐ svasyātisargō dānam |38|

विधि-द्रव्य-दातृ-पात्र-विशेषात्तद्विशेष: |३९|

Vidhi-dravya-dātr̥-pātra-viśēṣāttadviśēṣa: |39|


All copyrights reserved © 2Alotus

*।। इति तत्त्वार्थसूत्रे मोक्षशास्त्रे सप्तमोऽध्याय: ।।७।।*

*|| Iti tattvārthasutrē mōkṣaśāstrē saptamōadhyāya: ||7||*

**मिथ्यादर्शनाविरति-प्रमाद-कषाय-योगा बन्धहेतव: |१|**

Mithyādarśanāvirati-pramāda-kaṣāya-yōgā bandhahētava: |1|

**सकषायत्वाज्जीव: कर्मणो योग्यान् पुद्गलानादत्ते स बन्ध: |२|**

Sakaṣāyatvājjīva: Karmaṇō yōgyān pudgalānādattē sa bandha: |2|

**प्रकृति-स्थित्यनुभाग-प्रदेशास्तद्विधय: |३|**

Prakṛti-sthityanubhāga-pradēśāstadvidhaya: |3|

**आद्यो ज्ञानदर्शनावरण-वेदनीय-मोहनीयायुर्नाम-गोत्रान्तराया: |४|**

Ādyō jñānadarśanāvaraṇa-vēdanīya-mōhanīyāyurnāma-gōtrāntarāyā: |4|

**पञ्च-नव-द्वयष्टाविंशति-चतुर्द्वि-चत्वारिंशद् द्वि-पञ्चभेदा यथाक्रमम् |५|**

Pañca-nava-dvayaṣṭāvinśati-caturdvi-catvārinśad dvi-pañcabhēdā yathākramam |5|

**मति-श्रुतावधि-मन:पर्यय-केवलानाम् |६|**

Mati-śrutāvadhi-mana:Paryaya-kēvalānām |6|

**चक्षुरचक्षुरवधि-केवलानां निद्रा-निद्रानिद्रा-प्रचला-प्रचलाप्रचला –स्त्यानगृद्धयश्च |७|**

Cakṣuracakṣuravadhi-kēvalānāṁ nidrā-nidrānidrā-pracalā-pracalāpracalā –styānagṛd'dhayaśca |7|

**सदसद्वेद्ये |८|**

Sadasadvēdyē |8|

**दर्शन-चारित्र-मोहनीयाकषायकषाय-वेदनीयाख्यास्त्रिद्वि-नव-षोडशभेदा: सम्यक्त्व-मिथ्यात्व-तदुभयान्यकषाय-कषायौ हास्य-रत्यरति-शोक-भय-जुगुप्सा-स्त्री-पुन्नपुंसकवेदा अनन्तानु-बन्ध्यप्रत्याख्यानप्रत्याख्यान-संज्वलन-विकल्पाश्चैकश: क्रोध मान-माया-लोभा: |९|**

Darśana-cāritra-mōhanīyākaṣāyakaṣāya-vēdanīyākhyāstridvi-nava-ṣōḍaśabhēdā: Samyaktva-mithyātva-tadubhayān'yakaṣāya-kaṣāyau hāsya-ratyarati-śōka-bhaya-jugupsā-strīpunnapunsakavēdā anantānubandhyapratyākhyānapratyākhyāna-sañjvalana-vikalpāścaikaśa: Krōdha-māna-māyā-lōbhā: |9|


All copyrights reserved © 2Alotus

नारकतैर्यग्योन-मानुष-दैवानि |१०|

Nārakatairyagyōna-mānuṣa-daivāni |10|

गति-जाति-शरीरांगोपांग-निर्माण-बन्धन-संघात-संस्थान- संहनन-स्पर्श-रस-गन्ध-वर्णानुपूर्व्यागुरुलघूपघात-परघातातपोद्योतोच्छ्वास-विहायोगतय: प्रत्येकशरीर-त्रस-सुभग-सुस्वर-शुभ-सूक्ष्म-पर्याप्ति-स्थिरादेय-यश:कीर्ति-सेतराणि तीर्थकरत्वं च |११|

Gati-jāti-śarīrāṅgōpāṅga-nirmāṇa-bandhana-saṅghāta-sansthāna-sanhanana-sparśa-rasa-gandha-varṇānupūvryagurulaghūpaghāta-paraghātātapōdyōtōcchvāsa-vihāyōgataya: Pratyēkaśarīra-trasa-subhaga-susvara- śubha-sūkṣma-paryāpti-sthirādēya-yaśa:Kīrti-sētarāṇi tīrthankaratvam ca |11|

उच्चैर्नीचैश्च |१२|

Uccairnīcaiśca |12|

दान-लाभ-भोगोपभोग-वीर्याणाम् |१३|

Dāna-lābha-bhōgōpabhōga-vīryāṇām |13|

आदितस्तिसृणामंतरायस्य च त्रिंशत्सागरोपम-कोटीकोट्य: परा स्थिति: |१४|

Āditastisṛṇāmantarāyasya ca trinśatsāgarōpama-kōṭīkōṭya: Parā sthiti: |14|

सप्ततिर्मोहनीयस्य |१५|

Saptatirmōhanīyasya |15|

विंशतिर्नामगोत्रयो: |१६|

Vinśatirnāmagōtrayō: |16|

त्रयस्त्रिंशत्सागरोपमाण्यायुष: |१७|

Trayastrinśatsāgarōpamāṇyāyuṣa: |17|

अपरा द्वादश मुहूर्ता वेदनीयस्य |१८|

Aparā dvādaśa muhūrtā vēdanīyasya |18|

नामगोत्रयोरष्टौ |१९|

Nāmagōtrayōraṣṭau |19|

शेषाणामन्तर्मुहूर्ता |२०|

Śēṣāṇāmantarmuhūrtā |20|


All copyrights reserved © 2Alotus

विपाकोऽनुभव: |२१|

Vipākōanubhava: |21|

स यथानाम |२२|

Sa yathānāma |22|

ततश्च निर्जरा |२३|

Tataśca nirjarā |23|

नामप्रत्यया: सर्वतो योगविशेषात्-सूक्ष्मैकक्षेत्रावगाहस्थिता: सर्वात्मप्रदेशेष्वनन्तानन्तप्रदेशा: |२४|

Nāmapratyayā: Sarvatō yōgaviśēṣāt-sūkṣmaikakṣētrāvagāhasthitā: Sarvātmapradēśēṣvanantānantapradēśā: |24|

सद्वेद्य-शुभायुर्नाम-गोत्राणि पुण्यम् |२५|

Sadvēdya-śubhāyurnāma-gōtrāṇi puṇyam |25|

अतोऽन्यत्पापम् |२६|

Atōan'yatpāpam |26|

*।। इति तत्वार्थसूत्रे मोक्षशास्त्रे अष्टमोऽध्याय: ।।८।।*

*|| Iti tatvārthasutrē mōkṣaśāstrē aṣṭamōadhyāya: ||8||*

आस्रव-निरोध: संवर: |१|

Āsrava-nirōdha: Samvara: |1|

स गुप्ति-समिति-धर्मानुप्रेक्षा-परीषहजय-चारित्रै: |२|

Sa gupti-samiti-dharmānuprēkṣā-parīṣahajaya-cāritrai: |2|

तपसा निर्जरा च |३|

Tapasā nirjarā ca |3|

सम्यग्योगनिग्रहो गुप्ति: |४|

Samyagyōganigrahō gupti: |4|

ईर्या-भाषैषणादान-निक्षेपोत्सर्गा: समितय: |५|

Iryā-bhāṣaiṣaṇādāna-nikṣēpōtsargā: Samitaya: |5|


All copyrights reserved © 2Alotus

उत्तमक्षमा-मार्दवार्जव-शौच-सत्य-संयम-तपस्त्यागाकिंचन्य-ब्रह्मचर्याणि धर्म: |६|

Uttamakṣamā-mārdavārjava-śauca-satya-sanyama-tapastyāgākiñcan'ya-brahmacaryāṇi dharma: |6|

अनित्याशरण-संसारैकत्वान्यत्वाशुच्यास्रव-संवर-निर्जरा-लोक-बोधिदुर्लभ-धर्मस्वाख्यातत्त्वानुचिन्तनमनुप्रेक्षा: |७|

Anityāśaraṇa-sansāraikatvān'yatvāśucyāsrava-sanvara-nirjarā-lōka-bōdhidurlabha-dharmasvākhyātattvānucintana-manuprēkṣā: |7|

मार्गाच्च्यवन-निर्जरार्थं परिषोढव्या: परीषहा: |८|

Mārgāccyavana-nirjarārtham pariṣōḍhavyā: Parīṣahā: |8|

क्षुत्पिपासा-शीतोष्णदंशमशक-नाग्न्यारति-स्त्री-चर्या-निषद्या-शय्याक्रोश-वध-याचना-ऽलाभ-रोग-तृणस्पर्श-मल-सत्कारपुरस्कार-प्रज्ञाऽज्ञानादर्शनानि |९|

Kṣutpipāsā-śītōṣṇadanśamaśaka-nāgn'yārati-strī-caryā-niṣadyā- śayyākrōśa-vadha-yācanā-alābha-rōga-tṛṇasparśa-mala- satkārapuraskāra-prajñājñānādarśanāni |9|

सूक्ष्मसाम्पराय-छद्मस्थवीतरागयोश्चतुर्दश |१०|

Sūkṣmasāmparāya-chadmasthavītarāgayōścaturdaśa |10|

एकादश जिने |११|

Ēkādaśa jinē |11|

बादरसाम्पराये सर्वे |१२|

Bādarasāmparāyē sarvē |12|

ज्ञानावरणे प्रज्ञाऽज्ञाने |१३|

Jñānāvaraṇē prajñāajñānē |13|

दर्शनमोहान्तराययोरदर्शनाभौ |१४|

Darśanamōhāntarāyayōradarśanābhau |14|

चारित्रमोहे नाग्न्यारति-स्त्री-निषद्याक्रोश-याचना-सत्कारपुरस्कारा: |१५|

Cāritramōhē nāgn'yārati-strī-niṣadyākrōśa- yācanā-satkārapuraskārā: |15|


All copyrights reserved © 2Alotus

वेदनीये शेषा: |१६|

Vēdanīyē śēṣā: |16|

एकादयो भाज्या युगपदेकस्मिन्नैकोनविंशते: |१७|

Ēkādayō bhājyā yugapadēkasminnaikōnavinśatē: |17|

सामायिकच्छेदोपस्थापना-परिहारविशुद्धि-सूक्ष्मसाम्पराय-यथाख्यातमिति चारित्रम् |१८|

Sāmāyikacchēdōpa-sthāpanā-parihāraviśud'dhi-sūkṣmasāmparāya-yathākhyātamiti cāritram |18|

अनशनावमौदर्य-वृत्तिपरिसंख्यान-रसपरित्याग-विविक्तशय्यासन-कायक्लेशा बाह्यं तप: |१९|

Anaśanāvamaudarya-vr̥ttiparisaṅkhyāna-rasaparityāga-viviktaśayyāsana-kāyaklēśā bāhyaṁ tapa: |19|

प्रायश्चित्त-विनय-वैयावृत्य-स्वाध्याय-व्युत्सर्ग-ध्यानान्युत्तरम् |२०|

Prāyaścitta-vinaya-vaiyāvr̥ttya-svādhyāya-vyutsarga-dhyānān'yuttaram |20|

नव-चतुर्दश-पंचद्विभेदा यथाक्रमं प्राग्ध्यानात् |२१|

Nava-caturdaśa-pañcadvibhēdā yathākramaṁ prāgdhyānāt |21|

आलोचना-प्रतिक्रमण-तदुभय-विवेक-व्युत्सर्ग-तपश्छेद-परिहारोपस्थापना: |२२|

Ālōcanā-pratikramaṇa-tadubhaya-vivēka-vyutsarga-tapaśchēda parihārōpasthāpanā: |22|

ज्ञान-दर्शन-चारित्रोपचारा: |२३|

Jñāna-darśana-cāritrōpacārā: |23|

आचार्योपाध्याय-तपस्वि-शैक्ष्य-ग्लान-गण-कुल-संघ-साधु-मनोज्ञानाम् |२४|

Ācāryōpādhyāya-tapasvi- śaikṣya-glāna-gaṇa-kula-saṅgha-sādhu-manōjñānām |24|

वाचना-पृच्छनानुप्रेक्षाम्नाय-धर्मोपदेशा: ||२५||

Vācanā-pr̥cchanānuprēkṣāmnāya-dharmōpadēśā: ||25||

बाह्याभ्यन्तरोपध्यो: |२६|

Bāhyābhyantarōpadhyō: |26|


All copyrights reserved © 2Alotus

उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तर्मुहूर्तात् |२७|

Uttamasanhananasyaikāgracintānirōdhō dhyānamāntarmuhūrtāt |27|

आर्त्त-रौद्र-धर्म्य-शुक्लानि |२८|

Ārtta-raudra-dharmya–śuklāni | 28|

परे मोक्षहेतू |२९|

Parē mōkṣahētū |29|

आर्त्तममनोज्ञस्य संप्रयोगे तद्विप्रयोगाय स्मृति-समन्वाहार: |३०|

Ārttamamanōjñasya samprayōgē tadviprayōgāya smṛti-samanvāhāra: |30|

विपरीतं मनोज्ञस्य |३१|

Viparītaṁ manōjñasya |31|

वेदनायाश्च |३२|

Vēdanāyāśca |32|

निदानं च |३३|

Nidānaṁ ca |33|

तदविरत-देशविरत-प्रमत्तसंयतानाम् |३४|

Tadavirata-dēśavirata-pramattasanyatānām |34|

हिंसाऽनृत-स्तेय-विषयसंरक्षणेभ्यो रौद्रमविरत-देशविरतयो: |३५|

Hinsāanṛta-stēya-viṣayasamrakṣaṇēbhyō raudramavirata-dēśa-viratayō: |35|

आज्ञापाय-विपाक-संस्थान-विचयाय धर्म्यम् |३६|

Ājñāpāya-vipāka-sansthāna-vicayāya dharmyam |36|

शुक्ले चाद्ये पूर्वविद: |३७|

Śuklē cādyē pūrvavida: |37|

परे केवलिन: |३८|

Parē kēvalina: |38|


All copyrights reserved © 2Alotus

पृथक्त्वैकत्ववितर्क-सूक्ष्मक्रियाप्रतिपाति-व्युपरतक्रियानिवर्तीनि |३९|

Pṛthaktvaikatvavitarka-sūkṣmakriyāpratipāti-vyuparatakriyānivartīni |39|

त्र्येकयोग-काय-योगायोगानाम् |४०|

Tryēkayōga-kāya-yōgāyōgānām |40|

एकाश्रये सवितर्क-वीचारे पूर्वे |४१|

Ēkāśrayē savitarka-vīcārē pūrvē |41|

अवीचारं द्वितीयम् |४२|

Avīcāraṁ dvitīyam |42|

वितर्क: श्रुतम् |४३|

Vitarka: Śrutam |43|

वीचारोऽर्थ-व्यंजन-योगसंक्रान्ति: |४४|

Vīcārōartha-vyañjana-yōgasaṅkrānti: |44|

सम्यग्दृष्टि-श्रावक-विरतानन्त-वियोजक-दर्शनमोहक्षपकोपशमकोपशान्तमोह-क्षपक- क्षीणमोह-जिना: क्रमशोऽसंख्येयगुण निर्जरा: |४५|

Samyagdṛṣṭi-śrāvaka-viratānanta-viyōjaka-darśanamōhakṣapakōpaśamakōpaśāntamōha-kṣapaka-kṣīṇamōha-jinā: Kramaśōasaṅkhyēya-guṇa nirjarā: |45|

पुलाक-बकुश-कुशील-निर्ग्रन्थ-स्नातका निर्गन्था: |४६|

Pulāka-bakuśa-kuśīla-nirgrantha-snātakā nirganthā: |46|

संयम-श्रुत-प्रतिसेवना-तीर्थ-लिंग-लेश्योपपाद-स्थान-विकल्पत: साध्या: |४७|

Sanyama-śruta- pratisēvanā-tīrtha-liṅga-lēśyōpapāda-sthāna-vikalpata: Sādhyā: |47|

*।। इति तत्वार्थसूत्रे मोक्षशास्त्रे नवमोऽध्याय: ।।९।।*

*// Iti tatvārthasutrē mōkṣaśāstrē navamōadhyāya: //9//*

मोहक्षयाज्ज्ञान-दर्शनावरणान्तराय-क्षयाच्च केवलम् |१|

Mōhakṣayājjñāna-darśanāvaraṇāntarāya-kṣayācca kēvalam |1|


All copyrights reserved © 2Alotus

बन्धहेत्वभावनिर्जराभ्यां कृत्स्न-कर्म-विप्रमोक्षो मोक्ष:|२|

Bandhahētvabhāvanirjarābhyāṁ kṛtsna-karma-vipramōkṣō mōkṣa: |2|

औपशमिकादि-भव्यत्वानां च |३|

Aupaśamikādi-bhavyatvānāṁ ca |3|

अन्यत्र केवल-सम्यक्त्व-ज्ञान-दर्शन-सिद्धत्वेभ्य: |४|

An'yatra kēvala-samyaktva-jñāna-darśana-sid'dhatvēbhya: |4|

तदनन्तरमूर्ध्वं गच्छत्यालोकान्तात् |५|

Tadanantaramūrdhvaṁ gacchatyālōkāntāt |5|

पूर्वप्रयोगादसंगत्वाद् बन्धच्छेदात्तथागतिपरिणामाच्च |६|

Pūrvaprayōgādasaṅgatvād bandhacchēdāttathāgatipariṇāmācca |6|

आविद्धकुलालचक्रवद् व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्च |७|

Āvid'dhakulālacakravad vyapagatalē pālābuvadēraṇḍabījavadagni-śikhāvacca |7|

धर्मास्तिकायाभावात् |८|

Dharmāstikāyābhāvāt |8|

क्षेत्र-काल-गति-लिंग-तीर्थ-चारित्र-प्रत्येकबुद्धबोधित-ज्ञानावगाहनान्तर-
संख्याल्पबहुत्वत: साध्या: |९|

Kṣētra-kāla-gati-liṅga-tīrtha-cāritra-pratyēkabud'dhabōdhita-jñānāvagāhanāntara-
saṅkhyālpabahutvata: Sādhyā: |9|

*।। इति तत्त्वार्थसूत्रे मोक्षशास्त्रे दशमोऽध्याय:।।१०।।*

*|| Iti tattvārthasutrē mōkṣaśāstrē daśamōadhyāya: ||10||*

अक्षर-मात्रा-पद-स्वर-हीनं,व्यंजन-संधि-विवर्जित-रेफम् |
साधुभिरत्र मम क्षमितव्यं, को न विमुह्यति शास्त्रसमुद्रे ||१||

Akṣara-mātrā-pada-svara-hīnaṁ,vyañjana-sandhi-vivarjita-rēpham |
Sādhubhiratra mama kṣamitavyaṁ, kō na vimuhaîti śāstrasamudrē ||1||

दशाध्याये परिच्छिन्ने, तत्त्वार्थे पठिते सति |
फलं स्यादुपवासस्य, भाषितं मुनिपुंगवै: ||२||

Daśādhyāyē paricchinnē, tattvārthē paṭhitē sati |
Phalaṁ syādupavāsasya, bhāṣitaṁ munipuṅgavai: ||2||


All copyrights reserved © 2Alotus

तत्त्वार्थसूत्र - कर्त्तारं, गृद्धपिच्छोपलक्षितम् |
वंदे गणीन्द्र - संजातमुमास्वामि – मुनीश्वरम् ||३||
Tattvārthasūtra - karttāraṁ, gr̥d'dhapicchōpalakṣitam |
Vandē gaṇīndra - sañjātamumāsvāmi – munīśvaram ||3||

पढम-चउक्के पढमं, पंचमए जाणि पुग्गलं तच्च |
छह-सत्तमे हि आस्सव, अट्ठमए बंधणादव्वं ||४||
Paḍhama-ca'ukkē paḍhamaṁ, pañcama'ē jāṇi pōggalaṁ tacca |
Chaha-sattamē hi ās'sava, aṭṭhama'ē bandhaṇādavvaṁ ||4||

णवमे संवर - णिज्जर, दहमे मोक्खं वियाणेहि |
इह सत्त - तच्च भणिदं, दह - सुत्ते मुणिवरिं देहिं ||५||
Ṇavamē samvara - ṇijjara, dahamē mōkkhaṁ viyāṇēhi |
Iha satta-tacca bhaṇidaṁ, daha-suttē muṇivariṁ dēhiṁ ||5||

जं सक्कइ तं कीरइ, जं च ण सक्कइ तहेव सद्दहणं |
सद्दहमाणो जीवो, पावइ अजरामरं ठाणं ||६||
Jaṁ sakka'i taṁ kīra'i, jaṁ ca ṇa sakka'i tahēva saddahaṇaṁ |
Saddahamāṇō jīvō, pāva'i ajarāmaraṁ ṭhāṇaṁ ||6||

तवयरणं वयधरणं, संजम-सरणं च जीव-दया-करणं |
अंते समाहिमरणं, चउगई-दुक्खं णिवारे इ ||७||
Tavayaraṇaṁ vayadharaṇaṁ, sañjama-saraṇaṁ ca jīva-dayā-karaṇaṁ |
Antē samāhimaraṇaṁ, ca'uga'i-dukkhaṁ ṇivārē' i ||7||

अरहंत-भासियत्थं, गणहरदेवेहिं गंथियं सव्वं |
पणमामि भत्तिजुत्तो, सुदणाण-महोवयं सिरसा ||८||
Arahanta-bhāsiyat'thaṁ, gaṇaharadēvēhiṁ ganthiyaṁ savvaṁ |
Paṇamāmi bhattijuttō, sudaṇāṇa-mahōvayaṁ sirasā ||8||

गुरवो पांतु वो नित्यं, ज्ञान-दर्शन-नायका: |
चारित्रार्णव-गंभीरा: मोक्ष-मार्गोपदेशक:||९||
Guravō pāntu vō nityaṁ, jñāna-darśana-nāyakā: |
Cāritrārṇava-gambhīrā: Mōkṣa-mārgōpadēśaka: ||9||


All copyrights reserved © 2Alotus

कोटिशतं द्वादशं चैव, कोट्यो लक्षाण्यशीतिस्त्र्यधिकानि चैव ।
पंचाशदष्टौ च सहस्र-संख्यमेतद्श्रुतं पंचपदं नमामि ॥१०॥

Kōṭiśataṁ dvādaśaṁ caiva, kōṭyō lakṣāṇyaśītistryadhikāni caiva |
Pañcāśadaṣṭau ca sahasra-saṅkhyamētadśrutaṁ pañcapadaṁ namāmi ||10||

*।। इति तत्त्वार्थसूत्रापरनाम-तत्त्वार्थसूत्रे मोक्षशास्त्रं समाप्तम् ।।*

*|| Iti tattvārthasūtrāparanāma-tattvārthāsūtrē mōkṣaśāstraṁ samāptam ||*

* * * A * * *

2Alotus


All copyrights reserved © 2Alotus